# श्रीशिवनामावल्यष्टकम्

Ragas – Brindavana saranga, Dharmavathi, Hindolam, Amruthavarshini
Thalam – Adi

हे चन्द्रचूड मदनान्तक शूलपाणे स्थाणो गिरीश गिरिजेश महेश शम्भो।

भूतेश भीतभयसूदन मामनाथं संसारदुःखगहनाज्जगदीश रक्ष॥ १॥

हे पार्वतीहृदयवल्लभ चन्द्रमौले भूताधिप प्रमथनाथ गिरीशचाप।

हे वामदेव भव रुद्र पिनाकपाणे संसारदुःखगहनाज्जगदीश रक्ष॥ २॥

हे नीलकण्ठ वृषभध्वज पञ्चवक्त्रलोकेश शेषवलय प्रमथेश शर्व।

हे धूर्जटे पशुपते गिरिजापते मां संसारदुःखगहनाज्जगदीश रक्ष॥ ३॥

हे विश्वनाथ शिव शङ्कर  देवदेव गङ्गाधर प्रमथनायक नन्दिकेश।

बाणेश्वरान्धकरिपो हर लोकनाथ संसारदुःखगहनाज्जगदीश रक्ष॥ ४॥

वाराणसीपुरपते मणिकर्णिकेश वीरेश दक्षमखकाल विभो गणेश।

सर्वज्ञ सर्वहृदयैकनिवास नाथ संसारदुःखगहनाज्जगदीश रक्ष॥ ५॥

श्रीमन्महेश्वर कृपामय हे दयालो हे व्योमकेश शितिकण्ठ गणाधिनाथ।

भस्माङ्गराग नृकपालकलापमाल संसारदुःखगहनाज्जगदीश रक्ष॥ ६॥

कैलासशैलनिवास वृषाकपे हे मृत्युञ्जय त्रिनयन त्रिजगन्निवास।

नारायणप्रिय मदापह शक्तिनाथ संसारदुःखगहनाज्जगदीश रक्ष॥ ७॥

विश्वेश विश्वभवनाशक विश्वरूप विश्वात्मक त्रिभुवनैकगुणाधिकेश।

हे विश्वनाथ करुणामय दीनबन्धो संसारदुःखगहनाज्जगदीश रक्ष॥ ८॥

गौरीविलासभवनाय महेश्वराय पञ्चाननाय शरणागतकल्पकाय।

शर्वाय सर्वजगतामधिपाय तस्मै दारिद्र्यदुःखदहनाय नमः शिवाय॥ ९॥

he candracūḍa madanāntaka śūlapāṇe
sthāṇo girīśa girijeśa maheśa śambho |
bhūteśa bhītabhayasūdana māmanāthaṁ
saṁsāraduḥkhagahanājjagadīśa rakṣa || 1||

he pārvatīhṛdayavallabha candramaule
bhūtādhipa pramathanātha girīśacāpa |
he vāmadeva bhava rudra pinākapāṇe
saṁsāraduḥkhagahanājjagadīśa rakṣa || 2||

he nīlakaṇṭha vṛṣabhadhvaja pañcavaktra
lokeśa śeṣavalaya pramatheśa śarva |
he dhūrjaṭe paśupate girijāpate māṁ
saṁsāraduḥkhagahanājjagadīśa rakṣa || 3||

he viśvanātha śiva śaṅkara devadeva
gaṅgādhara pramathanāyaka nandikeśa |
bāṇeśvarāndhakaripo hara lokanātha
saṁsāraduḥkhagahanājjagadīśa rakṣa || 4 ||

vārāṇasīpurapate maṇikarṇikeśa
vīreśa dakṣamakhakāla vibho gaṇeśa |
sarvajña sarvahṛdayaikanivāsa nātha
saṁsāraduḥkhagahanājjagadīśa rakṣa || 5||

śrīmanmaheśvara kṛpāmaya he dayālo
he vyomakeśa śitikaṇṭha gaṇādhinātha |
bhasmāṅgarāga nṛkapālakalāpamāla
saṁsāraduḥkhagahanājjagadīśa rakṣa || 6||

kailāsaśailanivāsa vṛṣākape he
mṛtyuñjaya trinayana trijagannivāsa |
nārāyaṇapriya madāpaha śaktinātha
saṁsāraduḥkhagahanājjagadīśa rakṣa || 7||

viśveśa viśvabhavanāśaka viśvarūpa
viśvātmaka tribhuvanaikaguṇādhikeśa |
he viśvanātha karuṇāmaya dīnabandho
saṁsāraduḥkhagahanājjagadīśa rakṣa || 8||

gaurīvilāsabhavanāya maheśvarāya
pañcānanāya śaraṇāgatakalpakāya |
śarvāya sarvajagatāmadhipāya tasmai
dāridryaduḥkhadahanāya namaḥ śivāya || 9||

ஹே சந்த்3ரசூட3 மத3நாந்தக ஶூலபாணே
ஸ்தா2ணோ கி3ரீஶ கி3ரிஜேஶ மஹேஶஶம்போ4।
பூ4தேஶ பீ4தப4யஸூத3ந மாமநாத2ம்
ஸம்ஸாரது:3க2க3ஹநாஜ்ஜக3தீ3ஶ ரக்ஷ ॥ 1॥

ஹே பார்வதீஹ்ரு’த3யவல்லப4 சந்த்3ரமௌலே
பூ4தாதி4ப ப்ரமத2நாத2 கி3ரீஶசாப ।
ஹே வாமதே3வ ப4வ ருத்3ர பிநாகபாணே
ஸம்ஸாரது:3க2க3ஹநாஜ்ஜக3தீ3ஶ ரக்ஷ ॥ 2॥

ஹே நீலகண்ட2 வ்ரு’ஷப4த்4வஜ பஞ்சவக்த்ர
லோகேஶ ஶேஷவலய ப்ரமதே2ஶ ஶர்வ ।
ஹே தூ4ர்ஜடே பஶுபதே கி3ரிஜாபதே மாம்
ஸம்ஸாரது:3க2க3ஹநாஜ்ஜக3தீ3ஶ ரக்ஷ ॥ 3॥

ஹே விஶ்வநாத2 ஶிவ ஶங்கர தே3வதே3வ
க3ங்கா3த4ர ப்ரமத2நாயக நந்தி3கேஶ ।
பா3ணேஶ்வராந்த4கரிபோ ஹர லோகநாத2
ஸம்ஸாரது:3க2க3ஹநாஜ்ஜக3தீ3ஶ ரக்ஷ ॥ 4 ॥

வாராணஸீபுரபதே மணிகர்ணிகேஶ
வீரேஶ த3க்ஷமக2கால விபோ4 க3ணேஶ ।
ஸர்வஜ்ஞ ஸர்வஹ்ரு’த3யைகநிவாஸ நாத2
ஸம்ஸாரது:3க2க3ஹநாஜ்ஜக3தீ3ஶ ரக்ஷ ॥ 5॥

ஶ்ரீமந்மஹேஶ்வர க்ரு’பாமய ஹே த3யாலோ
ஹேவ்யோமகேஶ ஶிதிகண்ட2க3ணாதி4நாத2|

ப4ஸ்மாங்க3ராக3 ந்ரு’கபாலகலாபமால
ஸம்ஸாரது:3க2க3ஹநாஜ்ஜக3தீ3ஶ ரக்ஷ ‖ 6‖

கைலாஸஶைலவிநிவாஸ வ்ரு’ஷாகபே
ஹே ம்ரு’த்யுஞ்ஜய த்ரிநயந த்ரிஜக3ந்நிவாஸ ।
நாராயணப்ரிய மதா3பஹ ஶக்திநாத2
ஸம்ஸாரது:3க2க3ஹநாஜ்ஜக3தீ3ஶ ரக்ஷ ‖ 7‖

விஶ்வேஶ விஶ்வப4வநாஶக விஶ்வரூப
விஶ்வாத்மக த்ரிபு4வநைககு3ணாதி4கேஶ ।
ஹே விஶ்வநாத2 கருணாமய தீ3நப3ந்தோ4
ஸம்ஸாரது:3க2க3ஹநாஜ்ஜக3தீ3ஶ ரக்ஷ ‖ 8‖

கௌ3ரீவிலாஸப4வநாய மஹேஶ்வராய
பஞ்சாநநாய ஶரணாக3தகல்பகாய ।
ஶர்வாய ஸர்வஜக3தாமதி4பாய தஸ்மை
தா3ரித்3ர்யது:3க2த3ஹநாய நம: ஶிவாய ‖ 9‖